M.A. Sanskrit
Year – I
Semester – II
Paper - IV

# महाभाष्यम् – पस्पशाह्निकम्
# निरुक्तम् – नैघण्टुक काण्डः
# Mahabhashyam - Paspasahnikam
# Nirukta – Naighantuka kanda


**Centre for Distance and Online Education**

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey
R.K.Pirakas

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) ‘A’ श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# महाभाष्यम् – पस्पशाह्निकम्

# निरुक्तम् – नैघण्टुककाण्डः

**पाठ्यपरिचयः**

भारतीयसंस्कतेः मूलभूतग्रन्थः वेदः वर्तते। यः संस्कृतवाङ्मयस्य आदिमः ज्ञानराशित्वेन स्वीक्रियते। अयं वेदः ऋक्-यजुः-सामाथर्वभेदेन चतुर्विधः अस्ति। वेदार्थस्य अर्थावबोधनाय षडङ्गानि वर्तन्ते। तेषु मुख्यं भवति व्याकरणम्। तच्च व्याकरणम्- ऐन्द्रादीनि इमानि नवव्याकरणानि सन्तीति। नवसु व्याकरणेषु मुनित्रयप्रणीतं व्याकरणमेव वेदाङ्गत्वेन प्रसिद्धमस्ति। पाणिनीयमहर्षिप्रणीतानां सूत्राणां, कात्याययनमुनिविरचितानां वार्तिकानां च व्याख्यानग्रन्थः एव महाभाष्यमिति।

**प्रथमः खण्डः – अथशब्दानुशासनमित्यारभ्य आनुषङ्गिकव्याकरणाध्ययनपर्यन्तम् ।**

अस्मिन् खण्डे पस्पशाह्निकस्यादौ विवेचितानां विषयानां विवरणमस्ति तद्यथा- शब्दानुशासनस्य प्रस्तावना, लौकिकवैदिकभेदेन शब्दानां द्वैविध्यत्वम्, गवादिशब्दवाच्योऽर्थः कः? इति विचारः, शब्दानुशासनस्य मुख्यपञ्चप्रयोजनानि, शब्दानुशासनस्य त्रयोदश- आनुषाङ्गिकप्रयोजनानि इत्यादिविषयाः वर्तन्ते।

**द्वितीयः खण्डः – शास्त्रनिर्माणरीतिमारभ्य ज्ञाने धर्मो उत प्रयोगे इति पर्यन्तम् ।**

अस्मिन् खण्डे 'ॐ' इत्युक्त्वा वृत्तान्तशः, संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते, शास्त्रनिर्माणरीतिनिरूपणाधिकरणम्, जातिव्यक्तिपदार्थनिर्णयाधिकरणम्, शब्दनित्यत्वानित्यत्वविचारः, शास्त्रस्य धर्मजनकताधिकरणम्, सिद्धे शब्दार्थसंबन्धे नित्यतासाधकपक्षनिर्णयाधिकरणम्,

धर्मनियमाधिकरणम्, शब्दविषयप्रदर्शनाधिकरणम्, शब्दज्ञानस्य धर्मजनकताधिकरणम् इत्यादिविषयाः निरूपितााः सन्ति।

।

**तृतीयः खण्डः – व्याकरणाधिकारात् इति आरभ्य आह्निकसमाप्तिपर्यन्तम् ।**

अस्मिन् खण्डे सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः, शब्दाप्रतिपत्तिः, शब्दे ल्युडर्थः, भवे च तद्धितः, प्रोक्तादयश्च तद्धिताः, लक्ष्यलक्षणे व्याकरणम्, वर्णोपदेशाधिकरणम्, वृत्तिसमवायार्थ उपदेशः, अनुबन्धकरणार्थश्च, इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिक-दीर्घप्लुतानामप्युपदेशः, आकृत्युपदेशात्सिद्धम्, आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः, लिङ्गार्था तु प्रत्यापत्तिः इत्यादिविषयाः निरूपिताः सन्ति।

**चतुर्थः खण्डः – समाम्नायः समाम्नायः इति आरभ्य द्वितीयपादपर्यन्तम् ।**

यास्कः निरुक्तस्य प्रारम्भं 'समाम्नायः समाम्नातः' इति वाक्येन करोति । अत्र समाम्नायशब्दस्यार्थः वैदिकपदसमुदायो वर्तते । वैदिकसंहिताभ्यः शब्दान् सङ्गृह्य तेषां व्याख्यानमत्र क्रियते । समाम्नाय एव निघण्टुशब्देनोच्यते । मन्त्रार्थबोधकत्वादेव समाम्नायस्य निघण्टुत्वम् । छन्दोभ्यः समाहृत्य समाहृत्य इमे समाम्नाता वर्तन्ते।

तच्च निरुक्तं वेदपुरुषस्य श्रोत्राङ्गत्वेन प्रसिद्धमस्ति। यथोक्तम्-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**

**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं**

**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

इदं च निरुक्तं त्रिधा विभक्तं भवति तद्यथा- निघण्टुकाण्डम्, नैगमकाण्डम, दैवतकाण्डमिति। अत्र पाठ्यांशे निघण्टुकाण्डमेवस्ति।

**पञ्चमः खण्डः – तृतीयापादादारभ्य चतुर्थपादपर्यन्तम् ।**

अन्तिमे खण्डे तृतीये पादे यास्कः निपातानामर्थनिर्णयं करोति । परन्तु इमे त्रय एव भेदाः निपातानां भवन्ति इति वक्तुं न शक्यते । उपमार्थकाः अपि निपाताः पादपूरणा भवितुमर्हन्ति, ते कर्मोपसङ्ग्रहाः भवितुमर्हन्ति। चतुर्थे पादे शब्दानां धातुजत्वसिद्धान्तम् उपवर्णयति यास्कमतानुसारेण सर्वे शब्दाः धातुजाः। इममेव सिद्धान्तं पोषयितुं निरुक्तस्य रचना प्रतीयते।

| खण्डः | विषयः | पुटसङ्ख्या |
| --- | --- | --- |
| खण्डः क | अथशब्दानुशासनमित्यारभ्य आनुषङ्गिकव्याकरणाध्ययनपर्यन्तम् | 8-30 |
| खण्डः ख | शास्त्रनिर्माणरीतिमारभ्य ज्ञाने धर्मो उत प्रयोगे इति पर्यन्तम् | 31-50 |
| खण्डः ग | व्याकरणाधिकारात् इति आरभ्य आह्निकसमाप्तिपर्यन्तम् | 51-63 |
| खण्डः घ | समाम्नायः समाम्नायः इति आरभ्य द्वितीयपादपर्यन्तम् | 64-71 |
| खण्डः ङ | तृतीयापादादारभ्य चतुर्थपादपर्यन्तम् | 72-85 |

# खण्डः - क

## पाठसंरचना

प्रस्तावना

उद्देशयम्

अथशब्दानुशासनमित्यारभ्य आनुषङ्गिकव्याकरणाध्ययनपर्यन्तम्

बोधप्रश्नाः

शब्दावली

अभ्यासप्रश्नाः

सन्दर्भग्रन्थाः

सहायकग्रन्थाः

### अथ शब्दानुशासनम्।

## प्रस्तावना

भारतीयसंस्कतेः मूलभूतग्रन्थः वेदः वर्तते। यः संस्कृतवाङ्मयस्य आदिमः ज्ञानराशित्वेन स्वीक्रियते। अयं वेदः ऋक्-यजुः-सामाथर्वभेदेन चतुर्विधः अस्ति। वेदार्थस्य अर्थावबोधनाय षडङ्गानि वर्तन्ते। तेषु मुख्यं भवति व्याकरणम्। तच्च व्याकरणम्- ऐन्द्रादीनि इमानि नवव्याकरणानि सन्तीति। नवसु व्याकरणेषु मुनित्रयप्रणीतं व्याकरणमेव वेदाङ्गत्वेन प्रसिद्धमस्ति। पाणिनीयमहर्षिप्रणीतानां सूत्राणां, कात्यायनमुनिविरचितानां वार्तिकानां च व्याख्यानग्रन्थः एव महाभाष्यमिति। उक्तञ्च-

**योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन।**

**यऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिः प्राञ्जलिरानतोऽस्मि।।**

**उद्देश्यम्-**

1. पस्पशाह्निकस्याध्ययनेन छात्राः व्याकरणसशास्त्रस्य महत्वं ज्ञास्यन्ति।
2. व्याकरणाध्ययनस्य मुख्यानि प्रयोजनानि ज्ञाष्यन्ति।
3. व्याकरणाध्ययनस्य आनुसाङ्गिख्यानि प्रयोजनानि ज्ञाष्यन्ति।
4. केषां शब्दानामनुसासनं क्रियते तद्विषयकं ज्ञानं भविष्यति।

## महाभाष्यम्

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ॥

केषां शब्दानाम्?

लौकिकानां वैदिकानां च।

तत्र लौकिकास्तावत् – गौः- अश्वः- पुरुषः- हस्ती- शकुनिः- मृगः- ब्राह्मण इति ॥

वैदिकाः खल्वपि- शन्नो देवीरभिष्टये, इषे त्वोर्जे त्वा, अग्निमीळे पुरोहितम्, अग्न आयाहि वीतये इति ॥

अथ गौरित्यत्र कः शब्दः?

किं यत्तत्सास्ना-लाङ्गूल-ककुद-खुर-विषाण्यर्थरूपं, स शब्दः ?

नेत्याह। द्रव्यं नाम तत् ॥

यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्दः?

नेत्याह। क्रिया नाम सा ॥

यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः?

नेत्याह। गुणो नाम सः ॥

उद्योतः -

यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः ?

नेत्याह। आकृतिर्नाम सा ॥

कस्तर्हि शब्दः?

येनोच्चारितेन सास्ना-लाङ्गूल-ककुद-खुर-विषाणिनां सम्प्रत्ययो भवति, स शब्दः ॥

अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा- शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः ॥

## २. शास्त्रप्रयोजनाधिकरणम्

कानि पुनः शब्दानुशासनस्य प्रयोजनानि?

रक्षोहागमलघ्वसंदेहाः प्रयोजनम् ॥

रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति ॥

व्याकरणाध्ययनस्य पञ्चसु मुख्येषु आद्यं प्रयोजनमिदम्। रक्ष पालने इति धातोः भावार्थे "गुरोश्च हलः" इति सूत्रेण 'अ' प्रत्यये रक्ष इति जाते ततः स्त्रियां टापि रक्षा इति रूपम्। रक्षणमित्यर्थः। अत्र रक्षा न साधूनाम्। व्याकरणाध्यनेन तदसम्भवात् । अतः वेदानां रक्षाऽत्र अभिप्रेता। 'अर्थ' शब्दः प्रयोजनवाची। रक्षा अर्थः प्रयोजनं यस्य तदिति बहुव्रीहिः। व्याकरणमन्यपदार्थः। लोपश्च आगमश्च वर्णविकारश्च = लोपागमवर्णविकाराः। लोपागमवर्णविकारान् जानातीति लोपागमवर्णविकारज्ञः । द्वन्द्वसमासगर्भितकृद्वृत्तिः। लोके शब्दाः यथा प्रयुज्यन्ते, न तथा वेदे । लोपागमादेशानां विषये

लोकापेक्षया महान् भेदः वेदे दृश्यते। लौकिके प्रयोगे यत् वर्णलोपादिकं कार्य न विलोक्यते, तत् वेदे तु साक्षात्क्रियते। तादृशं कार्यं दृष्ट्वा अवैयाकरणः भवेद् भ्रान्तः। तेन च भ्रमेण वेदे पाठान्तरं च कल्पयेत् कदाचित्। वैयाकरणस्तु न भ्रमति । अर्थात् सिद्धं पाठं त्यक्त्वा पाठान्तरं न हि कल्पयति। तत्तत्प्रयोगसम्बन्धिसूत्राणामध्ययनेन अनायासेन यथास्थितपाठमङ्गीकर्तुं प्रभवति सः। अत एव वेदार्थं चाध्यवस्यति। एवञ्च वेदार्थज्ञानपूर्वकशुद्धः ततन्मन्त्रैः वेदविहितकर्मानुष्ठानेन स्वर्गसुखम्, उपनिषदर्थज्ञानेन मोक्षाख्यः पुरुषार्थश्च व्याकरणाध्ययनस्य फलं भवति। वेदे लोपागमयोरुदाहरणं यथा देवा अदुह्र। दुह प्रपूरणे इति अदादिगणपठिताद् उभयपदिनि आत्मनेपदिनः धातोः "अनयतने लङ्" इति सूत्रेण लङि "तिप्तस्झि" इत्यादिना प्रथमपुरुषबहुवचने झ आदेशे "कर्तरि शप्" इति सूत्रेण शपि विकरणे "अदिप्रभृतिभ्यः शपः" इति तस्य विकरणस्य लुकि "आत्मनेपदेष्वनतः" इति सूत्रेण झस्य अदादेशे "लोपस्त आत्मनेपदेषु इति सूत्रेण 'अत्' इत्यत्र 'त' शब्दस्य लोपे अदुह् अ इति स्थिते "बहुलम् उन्दसि इति सूत्रेण अवशिष्टस्य 'अ' प्रत्ययस्य रुडागमे कृते अयुद्ध इति सिध्यति। अत्र वैदिकप्रक्रियायां विहितौ तलोप- रुडागमौ लोके न भवतः । तत्र अदुहत इत्येव रूपम्। एनं लौकिकं प्रयोगं दृष्ट्वा वेदे भ्राम्येदवैयाकरणः। अधीती व्याकरणे तु वैदिकप्रक्रियाविज्ञानात् न भ्राम्यति । भाष्येऽस्मिन् वर्णविकारः इत्यत्र विकारो नाम आदेशः। उदा- "उद्राभं च निग्राभं च ब्रह्मदेवा अवीवृधन्"। अत्र उत् उपसर्गपूर्वात् ग्रह उपादाने इति धातोः "उदि ग्रहः" इति भावे घञ् प्रत्यये "अत उपधायाः" इति धातोः उपधाभूतस्य अकारस्य वृद्धौ आकारे उद्ग्राहः इति रूपम्। वेदे "हृग्रहोर्भश्छन्दसि" इति वार्तिकेन यह धातोः

हकारादेशः विहितः। स च "हस्येति वक्तव्यम् इति वचनेन हकारस्य स्थाने प्रवर्तते। तेन वेदे उदग्राभम् इति रूपम्। एवं निपूर्वकात् ग्रह धातोः पूर्ववत घञ् प्रत्यये "उदयाभनियाभौ छन्दसि' इति वार्तिकेन हकारस्य भकारादेशः। तेन निग्राभमिति रूपम्। प्रागुक्तरीत्या अवैकरणाः इमां वैदिकीप्रक्रियामविज्ञाय भ्रमेण पाठान्तरं कल्पयेत्। अतः तादृशस्य अज्ञानस्य निवृत्तये व्याकरणमध्येतव्यम्। इत्थं व्याकरणाध्ययनं वेदरक्षणे उपकरोति।

**ऊहः** खल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथाऽर्थं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथाऽर्थं विपरिणमयितुम् । तस्माद‌ध्येयं व्याकरणम्॥

ऊहः खल्वपि।

व्याकरणाध्ययनस्य प्रधानेषु पञ्चसु प्रयोजनेषु द्वितीयं प्रयोजनं प्रतिपादितं भाष्ये ऊहः इति। उह वितर्के इति धातोः भावे इति सूत्रेण भावे घञ् प्रत्यये ऊह इति शब्दः सिध्यति। "अध्यहारस्तर्कः ऊहः इत्यमरवचनानुसारेण ऊहो नाम अध्याहारः। ऊहः अप्राप्तस्यार्थस्य उत्क्षेपणम्। असमवेतार्थकपदत्यागपूर्वक- समवेतार्थकपदसमभिव्याहारकरणमूहः। अस्यैव अपूर्वोत्प्रेक्षणमिति व्यवहारः। अत एवायं प्रयोगः अनुक्तमप्यूहति पण्डितो जनः इति। उमामहेश्वरसंवादे श्रूयते च यथा

**इमे मनुष्या दृश्यन्ते उहापोहविशारदाः।**

**ज्ञानविज्ञानसम्पन्नाः प्रजायन्तोऽथ कोविदाः ॥**

"खल्यपि इत्यत्र खलु, अपि इति निपातद्वयसमुदायः निश्चयार्यकः। ऊहः खल्वपि इत्यस्य प्रयोजनमिति शेषः। मध्ये यथार्थम् नाम अर्थप्रकाशनसामर्थ्यानतिलङ्घनेन इत्यर्थः। यागः प्रकृति-विकृतिभेदेन द्विविधः। यत्र अङ्गजातं पूर्णमुपदिष्टं सा प्रकृतिः। यत्र अङ्गजातं पूर्णं नोपदिष्टं सा विकृतिः। प्रकृतिवद् विकृतिः कर्तव्या इति मीमांसकैः कश्चन न्यायः व्यवस्थापितः। यथा-सोपकारा प्रकृतिरनुष्ठीयते, तथा विकृतिरपीति तदर्थः। अनेन च वाक्येन उपकारान्वयमात्रेण विकृतेः कथम्भावाकाङ्क्षायाः अनिवर्तनात् तत्पृष्ठभावेन पदार्थाः अपि अतिदिश्यन्ते। प्रकृतिप्रत्ययादीनामूहं वैयाकरण एव सुष्ठु जानाति उदा अग्निदेवताकः मन्त्रः श्रूयते यथा अग्नये त्वा जुष्टं निर्वपामि इति। विकृतियागे मन्त्रः श्रूयते "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः" इति। तत्र अग्निदेवताकमन्त्रस्थम् "अग्नये" इति पदं सूर्यसम्बन्धिनिर्वापप्रकाशने समर्थं न भवतीति अग्निपदमपहाय तत्स्थाने सूर्याय इति पदस्य अनेन सूर्याय त्वा जुष्टं निर्वपामि इति कल्प्यते। एवं स्थिते "अनाम्नाता अमन्त्राः" इत्यापस्तम्भोक्तरीत्या यद्यपि ऊहे मन्त्रत्वं न, तथापि एकदेशविकृतन्यायेन ऊहेऽपि अनेकपदसमुदाये मन्त्रत्वप्रत्यभिज्ञानात् अहितपदघटिते समुदाये मन्त्रत्वव्यवहारः, कर्मणस्साङ्गत्वं च सिध्यत्येव। मध्ये "लिङ्गैः" इति पदं प्रकृत्यादेरुपलक्षणम्। इदमुदाहरणं प्रकृत्यूहस्य। एवं प्रकृतिलिङ्गवचनोहस्योदाहरणं यथा देवीरापः शुद्धाः स्थ" इति अप्सु

विनियुक्तमन्त्रस्य आज्ये विनियोगाय देवाज्यशुद्धमसि इति मन्त्रे स्त्रीलिङ्ग- बहुवचनयोः स्थाने पुंलिङ्ग-एकवचनयोः ऊहः। ऊहजो हि आर्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखमप्यनुभवति, स्वर्गसुखं च। "ऊहः" वाक्यपदीयेऽपि

**अहोऽस्मिन् विषये न्याय्यः सम्बन्धोऽस्य न बाध्यते।**

**सामान्यस्यातिदेशोऽयं विशेषोऽत्रातिदिश्यते।।**

वाक्यकाण्डे अष्टसप्ततितमेयं कारिका। कारिकार्थः अस्मिन् विषये पदविषये, विभक्तिवचनविषये वा न्याय्यः कर्तव्यः= परिणामः, ऊहः = ऊहः इति कथ्यते। अस्य प्रकृतियागात् समागते वाक्ये "अग्नये त्वा जुष्टं निर्वपामि इत्यत्र "अग्नये" इत्यस्य स्थाने सूर्याय इति ऊहात् परम् अवशिष्टस्य वाक्यस्य, सम्बन्धः = सम्बन्धः, न बाध्यते =न बाधितो भवति। अयम्= एषः, सामान्यातिदेशः = "प्रकृतिवद् विकृतिः कर्तव्या" इति कथनं सामान्यातिदेशः। विशेषः= विशेषेऽपि, अत्र= एतेषु कर्मसु अतिदिश्यते इति। इत्थं व्याकरणशास्त्राध्ययनेन ऊहः इति प्रयोजनं सिध्यति। अनया रीत्याव्याकरणाध्ययनस्य मुख्येषु पञ्चसु प्रयोजनेषु द्वितीयं प्रयोजनम् ऊहः इति विवृतः।

**आगमः** खल्वपि । 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः' इति ॥ प्रधानं च षड्ङ्गेषु व्याकरणम् । प्रधाने कृतो यत्नः फलवान्भवति ॥

व्याकरणाध्ययनस्य मुख्यप्रयोजनेषु पञ्चसु तृतीयं प्रयोजनम् "आगमः" इति। आङुपसर्गपूर्वकात् गम्लृ गतौ इति धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इति सूत्रेण अच् प्रत्यये आगमशब्दः सिध्यति। बह्वर्थकोऽयं शब्दः प्रकृते श्रुतिरूपशास्त्रपरः। अत्र प्रयोजनं नाम प्रयोजनः = प्रवर्तकः। व्याकरणाध्ययने प्रवृत्तये भगवती श्रुतिं प्रमाणतया प्रदर्शयति भाष्यकारः यथा आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने कृतो यत्नः फलवान् भवति इति। इयं श्रुतिः व्याकरणाध्ययनस्य नित्य- काम्यकर्मतां बोधयति। नित्यत्वं च अध्येय-ज्ञेयपदार्थविशेषणीभूतयोः धर्मत्वे नाभिमतयोः अध्ययन-ज्ञानयोः। अत्र ब्राह्मणेन इत्युक्त्या तदितरेषां व्याकरणाध्ययनं काम्यमेव, ब्राह्मणानां तु सन्ध्योपासनादिवत् नित्यं कर्मेति तदाशयः। निष्कारणः इत्यत्र कारणं नाम फलमित्यर्थः। एवञ्च दृष्टं फलं किमप्यनपेक्ष्य इत्यर्थः। अध्ययनज्ञाननिष्ठं कारणानपेक्षत्वं विषये= वेदे आरोप्य "निष्कारणो वेदः" इति प्रयोगः।

**अत्र शङ्का-**

"आगमः" नाम श्रुतिरित्युक्तम्। श्रुतिः अपौरुषेया, अत एव नित्या। इदं च व्याकरणं मुनित्रयप्रणीतत्वादनित्यमिति नित्यानित्यसंयोगविरोधात् आगमशब्द- बोध्यत्वमस्य कथं वा उपपद्यते इति।

**अत्र शङ्कापरिहारः**

अस्याः शङ्कायाः परिहारः शाङ्करभाष्यतः लभ्यते। तथा हि शाब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् इति ब्रह्मसूत्रे भाष्ये-

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**

**आदी वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥**

**नाम रूपं च भूतानां कर्मणां च प्रवर्तनम् ।**

**वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः ॥**

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।**

**वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥**

इत्यादिस्मृतीनां श्रुतिमूलिकानां तथा "समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च इति सूत्रभाष्ये "धाता यथापूर्वमकल्पयत्" इति श्रुतेः तदर्थभूतानां तेषां यानि कर्माणि प्राक् सृष्ट्या प्रतिपेदिरे।

**तेषां ये यानि कर्माणि प्राक् सृष्ट्या प्रतिपेदिरे।**

**तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः॥**

**ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः।**

**शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः ।।**

**यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये।**

**दृश्यन्ते तानि तान्येव तथा भावा युगादिषु।।**

**यथाभिमानिनोऽतीतास्तुल्यास्ते साम्प्रतैरिह।**

**देवा देवैरतीतैर्हि रुपैर्नामभिरेव च।।**

**लघ्वर्थं** चाध्येयं व्याकरणम् । 'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इति, न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः विज्ञातुम् ॥

लाघवम्। लघुशब्दात् "इगन्ताच्च लघुपूर्वात्" इति सूत्रेण अण्प्रत्ययान्तमिदं रूपम्। लाघवम् लघुत्वमित्यर्थः। ब्राह्मणेन शब्दाः ज्ञेयाः, ज्ञात्वा इतरेभ्यः बोधनीयाश्च। अध्ययनमात्र तस्य न कर्तव्यम्, अपि चाध्यापनमपि। अत्र च स्मृतिवचनं मानम्। तद्यथा-

**अध्यापनमध्ययनं यजनं याजनं तथा।**

**दानं प्रतिग्रहचैव षट्कर्माण्यग्रजन्मनः॥ इति।।**

मनुवचनानुसारेण ब्राह्मणानां षट्कर्मान्तर्गतं कर्म भवति अध्यापनम्। अध्यापनं नाम पाठनम्। इदमेव विद्यादानमित्युच्यते। अत्र प्रसङ्गात् अग्निपुराणोक्तदिशा विद्यादानस्य महिमा किञ्चिदिव प्रस्तूयते।

**विद्यादानात् परं दानं न भूतं न भविष्यति।**

**तस्माद्विद्या सदा देया पण्डितैर्धार्मिकैर्द्विजैः ॥**

**यत्पुण्यं सर्वतीर्थानां विधिवद्यजतां तथा।**

**तत्पुण्यं समवाप्नोति विधिवच्छास्त्रदः पुमान्॥**

**वाजपेयसहस्रस्य सम्यगिष्टस्य यत्फलम्।**

**तत्फलं समवाप्नोति विद्यादानान्न संशयः ॥**

**धर्माधर्मं न जानाति लोकोऽयं विद्यया विना ।**

**शाला तस्मात् सदैव धर्मात्मा विद्यादानरतो भवेत्॥**

ब्रह्मवैवर्तपुराणे विद्यादाता पितृत्वेन वर्णितो यथा-

**अन्नदाता भयत्राता पत्नीदाता तथैव च।**

**विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ॥**

देवीपुराणे विद्यादानस्य महिमा वर्णितो यथा-

**यस्तु देव्या गृहे नित्यं विद्यादानं प्रवर्तयेत्।**

**स भवेत् सर्वलोकानां पूज्यः पूजापदं व्रजेत्॥**

**सिद्धान्तमोक्षशास्त्राणि वेदान् स्वर्गादिसाधकान्।**

**तदङ्गानीतिहासानि देया धर्मविवृद्धये ॥**

**तस्मात् सर्वप्रयत्नेन विद्या देया सदा नरैः।**

**इह कीर्तिमवाप्नोति मृतो याति परां गतिम्॥**

अध्यापनस्य शैली निर्दिशति नन्दिपुराणं यथा-

**संस्कृतैः प्राकृतैर्वाक्यैर्यश्शिष्यमनुरूपतः ।**

**देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥**

अनया रीत्या यो ब्राह्मणः शब्दज्ञानवान् भवति सः पण्डितः सन् स्वयं तरति, तारयति च शिष्यान्। अत एव भाष्ये "अवश्यम्" इत्यनेन विवक्षितः आशयः कैयटेन व्याख्यातो यथा "अध्यापनं ब्राह्मणस्य वृत्तिः । न च अशब्दज्ञं तमुपश्लिष्यन्ति वेदाः इति। भाष्ये लघ्वर्थं नाम प्रतिपदपाठापेक्षया प्रकृतिप्रत्ययविभागकल्पनेन अन्वाख्यानमेव। अनया रीत्या लाघवमित्याख्यं व्याकरणाध्ययनप्रयोजनं भाष्ये व्याख्यातम्

**असन्देहार्थं** चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति –'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति । तस्यां सन्देहः - स्थूला चासौ पृषती च, स्थूलानि वा पृषन्ति यस्याः सा - स्थूलपृषतीति । तां वैयाकरणः स्वरतोऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ अन्तोदात्तत्वं तस्तत्पुरुष इति ॥

व्याकरणाध्ययनस्य मुख्यप्रयोजनेषु पञ्चसु अन्त्यं प्रयोजनमिदमसन्देहाख्यम् । अयमाशयः सम् उपसर्गपूर्वकात् दिह उपचये इति धातोः भावे घञ् प्रत्यये सन्देहः इति रूपम्।

**एकधर्मिविषयकं विरुद्धभावाभावप्रकारकं ज्ञानं सन्देहः।**

"विचिकित्सा तु संशयः। सन्देहद्वापरौ च इत्यमरसिंहवचनानुसारेण विचिकित्सा, संशयः, सन्देहः, द्वापरः इत्येते शब्दाः पर्यायाः। न सन्देहः असन्देहः। सन्देहस्य अभावः इत्यर्थः। असन्देहपरिपालनं च व्याकरणाध्ययनप्रयोजनम्। अत एव पूर्वस्मिन् श्रुतिवाक्ये "स्थूलपृषतीम्" इत्यत्र स्थूला चासौ पृषती च इति कर्मधारयसमासः, उत स्थूलानि पृषन्ति यस्यां सा इति बहुव्रीहिर्वा इति संशयः। कर्मधारयसमासे पृषतीशब्देन मत्वर्थलक्षणया पृषद्वती बिन्दुमती गौः अभिधीयते। स्थूलापि गौरेव। बिन्दुषु न स्थौल्यस्य अन्वयः । बहुव्रीहिसमासे तु पृषत्सु स्थौल्यगुणस्य अन्वयः, न तु गवि। अतः अत्र संशयः जायते किमत्र कर्मधारयः स्वीकर्तव्यः, उत बहुव्रीहिर्वा? इति। अयं च संशयः स्वरेणैव वारयितुं शक्यः। तथा च "फिषोऽन्त उदात्तः" इति फिट्सूत्रेण स्थूलशब्देऽकारस्य उदात्तत्वेन "बहुव्रीहौ प्रकृत्या पूर्वपदम् इति सूत्रेण पूर्वपदप्रकृतिस्वरेण बहुव्रीहिसमास इत्येव निर्णयः। एवञ्चात्र स्वरस्य आधारेण समासनिर्णयः कृतः। एवं रीत्या व्याकरणाध्ययनेन स्वरविषयकः सन्देहः वार्यते। इत्थं शब्दशास्त्राध्ययनस्य रक्षा , ऊहः , आगमः , लाघवम् , असन्देहः इत्याख्यानि पञ्च मुख्यप्रयोजनानि महाभाष्ये वर्णितानि दृश्यन्ते। चतुर्षु एतेषु "आगमः" प्रयोजयतीति प्रयोजनः इति व्युत्पत्त्या प्रवर्तकः इत्यर्थपरः इति प्रतिपादितमेव प्राक्।

**पाठस्य सारः**

एतावता अस्मिन् पाठे व्याकरणशास्त्राध्ययनाय श्रुतिः प्रेरयतीति, एतदध्ययनं ब्राह्मणस्य नित्यं कर्मेति च निरूपितम्। मुनित्रयप्रणीतस्य पौरुषेयस्यापि व्याकरणशास्त्रस्य नित्यत्वं विस्तरेण सप्रमाणं प्रतिपादितम्। शिक्षादीनां पञ्चानां वेदाङ्गानामपेक्षया व्याकरणस्यैव प्राधान्यमिति विचारितम् ।

एवं साधुशब्दज्ञानाय इमानि च भूयः शब्दानुशासनप्रयोजनानि - तेऽसुराः । दुष्टः शब्दः । यदधीतम् । यस्तु प्रयुङ्क्ते । अविद्वांसः । विभक्तिं कुर्वन्ति । यो वा इमाम् । चत्वारि । उत त्वः । सक्तुमिव । सारस्वतीम् । दशम्यां पुत्रस्य । सुदेवो असि वरुण - इति ॥

**तेऽसुराः -**

'तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुः । तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः' ॥ म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् । तेऽसुराः॥

**दुष्टः शब्दः-**

**'दुष्टः शब्दः स्वरतो वर्णतो वा**

**मिथ्याप्रयुक्तो न तमर्थमाह ।**

**स वाग्वज्रो यजमानं हिनस्ति**

**यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥' इति ॥**

दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् ॥ दुष्टः शब्दः ॥

**यदधीतम् –**

**'यदधीतमविज्ञातं निगदेनैव शब्द्यते ।**

**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥'**

**तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् ॥**

**यदधीतम् ॥**

**यस्तु प्रयुङ्क्ते-**

**'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले।**

**सोऽनन्तमाप्नोति जयं परत्र वाग्योगवित् दुष्यति चापशब्दैः ॥'**

कः? वाग्योगविदेव ॥ कुत एतत् ? यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानाति । यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति । भूयांसोऽपशब्दाः,

अल्पीयांसः शब्दा इति । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा -गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। अथ योऽवाग्योगवित्, अज्ञानं तस्य शरणम् ॥

विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति । यो ह्यजानन् वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात् ॥

एवं तर्हि—

सोऽनन्तमाप्नोति जयं परत्र

वाग्योगवित् दुष्यति चापशब्दैः॥

कः ?

अवाग्योगविदेव।

अथ यो वाग्योगवित्, विज्ञानं तस्य शरणम् ॥

क्व पुनरिदं पठितम्?

भ्राजा नाम श्लोकाः ॥

किंच भोः श्लोका अपि प्रमाणम् ? किं चातः? यदि प्रमाणम् , अयमपि प्रमाणं भवितुमर्हति –

**'यद्दुदुम्बरवर्णानां घटीनां मण्डलं महत् ॥**

**पीतं न गमयेत्स्वर्गं किं तत्क्रतुगतं नयेत् ॥ 'इति ॥**

प्रमत्तगीत एष तत्रभवतः । यस्त्वप्रमत्तगीतस्तत्प्रमाणम् ॥ यस्तु प्रयुङ्क्ते ॥

**अविद्वांसः-**

**'अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।**

**कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥'**

**स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ॥ अविद्वांसः ॥**

**विभक्तिं कुर्वन्ति** -

याज्ञिकाः पठन्ति-'प्रयाजाः सविभक्तिकाः कार्याः' इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् ॥ विभक्तिं कुर्वन्ति ॥

**यो वा इमाम् -**

'यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवति' । आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् ॥ यो वा इमाम् ॥

**चत्वारि-**

**'चत्वारि श्रृङ्गा त्रयो अस्य पादा**

**द्वे शीर्षे सप्त हस्तासो अस्य ।**

**त्रिधा बद्धो वृषभो रोरवीति**

**महो देवो मर्त्यॉं आविवेश ॥' इति ।**

चत्वारि श्रृङ्गाणि - पदजातानि, नामाख्यातोपसर्गनिपाताश्च ॥ त्रयो अस्य पादाः - त्रयः कालाः = भूतभविष्यद्वर्तमानाः ॥ द्वे शीर्षे - द्वौ शब्दात्मानौ - नित्यः कार्यश्च ॥ सप्तहस्तासो अस्य - सप्त विभक्तयः। त्रिधा बद्धः - त्रिषु स्थानेषु बद्धः - उरसि कण्ठे शिरसीति ॥ वृषभो वर्षणात् ॥ रोरवीति - शब्दं करोति ॥ कुत एतत् ? रौतिः शब्दकर्मा॥ महोदेवो मर्त्यां आविवेशेति । महान्देवः - शब्दः, मर्त्याः - मरणधर्माणो मनुष्याः, तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्॥

अपर आह -

**'चत्वारि वाक्परिमिता पदानि**

**तानि विदुर्ब्राह्मणा ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति**

**तुरीयं वाचो मनुष्या वदन्ति ॥'**

'चत्वारि वाक्परिमिता पदानि' चत्वारि पदजातानि - नामाख्यातोपसर्गनिपाताश्च ॥ 'तानि विदुर्ब्राह्मणा ये मनीषिणः।' मनस ईषिणः - मनीषिणः॥ 'गुहा त्रीणि निहिता नेङ्गयन्ति' गुहायां त्रीणि निहितानि नेङ्गयन्ति - न चेष्टन्ते, न निमिषन्तीत्यर्थः ॥ 'तुरीयं वाचो मनुष्या वदन्ति ॥' तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते । चतुर्थमित्यर्थः ॥ चत्वारि ॥

**उतत्वः -**

**'उत त्वः पश्यन्न ददर्श वाच-**

**मुत त्वः शृण्वन्न शृणोत्येनाम् ।**

**उतो त्वस्मै तन्वं विसस्रे**

**जायेव पत्य उशती सुवासाः॥'**

अपि खल्वेकः पश्यन्न पश्यति, अपि खल्वेकः शृण्वन्न शृणोत्येनामिति - अविद्वांसमाहार्धम् ॥ उतो

त्वस्मै तन्वं विसस्रे - तनुं विवृणुते । जायेव पत्य उशती सुवासाः । तद्यथा - जायेव पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाक् वाग्विदे स्वात्मानं विवृणुते ॥ वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ॥ उत त्वः ॥

**सक्तुमिव** -

**'सक्तुमिव तितउना पुनन्तो**

**यत्र धीरा मनसा वाचमक्रत ।**

**अत्रा सखायः सख्यानि जानते**

**भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥'**

सक्तुः - सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति । तितउ - परिपवनं भवति, ततवद्वा, तुन्नवद्वा । धीराः - ध्यानवन्तः, मनसा - प्रज्ञानेन, वाचमक्रत - अकृषत ।

'अत्रा सखायः सख्यानि जानते' अत्र सखायः सन्तः सख्यानि जानते - सायुज्यानि जानते ।

क्व?

य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः ॥

के पुनस्ते?

वैयाकरणाः ॥

कुत एतत्?

'भद्रैषां लक्ष्मीर्निहिताऽधिवाचि।'

एषां वाचि भद्रा लक्ष्मीर्निहिता भवति । लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति ॥ सक्तुमिव ॥

**सारस्वतीम्** –

याज्ञिकाः पठन्ति - 'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्' इति ॥

प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् ॥

सारस्वतीम् ॥

**दशम्यां पुत्रस्य -**

याज्ञिकाः पठन्ति - 'दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्' इति ॥ न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम् ॥

दशम्यां पुत्रस्य ॥

**सुदेवो असि वरुण –**

**'सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।**

**अनु क्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥'**

'सुदेवो असि वरुण' - सत्यदेवोऽसि, 'यस्य ते सप्त सिन्धवः ।' - सप्त विभक्तयः, 'अनुक्षरन्ति काकुदम्' काकुदं=तालु । काकुः =जिह्वा, साऽस्मिन्नुद्यत इति - काकुदम् । 'सूर्म्यं सुषिरामिव ।' तद्यथा - शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः - सप्त विभक्तयस्तात्ल्वनुक्षरन्ति । तेनासि सत्यदेवः ॥ सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् ॥

सुदेवो असि ॥

**अवबोधप्रश्नाः**

1. व्याकरणाध्ययनस्य मुख्यप्रयोजनानि कति सन्ति?
2. व्याकरणाध्ययनस्य आनुषाङ्गिकप्रयोजनानि कति सन्ति?
3. दशम्युत्तरकालं पुत्रस्य जातस्य किम् विदध्यात्?
4. जायेव पत्य उशती सुवासाः इत्यस्य कोऽभिप्रायः?

# खण्डः ख

## पाठसंरचना

प्रस्तावना

उद्देशयम्

शास्त्रनिर्माणरीतिमारभ्य ज्ञाने धर्मो उत प्रयोगे इति पर्यन्तम्

बोधप्रश्नाः

शब्दावली

अभ्यासप्रश्नाः

सन्दर्भग्रन्थाः

सहायकग्रन्थाः

**प्रस्तावना-**

अस्मिन् खण्डे 'ॐ' इत्युक्त्वा वृत्तान्तशः, संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते, शास्त्रनिर्माणरीतिनिरूपणाधिकरणम्, जातिव्यक्तिपदार्थनिर्णयाधिकरणम्, शब्दनित्यत्वानित्यत्वविचारः,

शास्त्रस्य धर्मजनकताधिकरणम्, सिद्धे शब्दार्थसंबन्धे नित्यतासाधकपक्षनिर्णयाधिकरणम्, धर्मनियमाधिकरणम्, शब्दविषयप्रदर्शनाधिकरणम्, शब्दज्ञानस्य धर्मजनकताधिकरणम् इत्यादिविषयाः निरूपितााः सन्ति।

**उद्देश्यम्-**

1. छात्रणां कृते शास्त्रनिर्माणरीतिनिरूपणाधिकरणस्य ज्ञानं भविष्यति।
2. छात्राः शब्दनित्यत्वानित्यत्वविचारं ज्ञाष्यन्ति।
3. छात्राःजातिव्यक्तिपदार्थनिर्णयाधिकरणं ज्ञाष्यन्ति।
4. शब्दज्ञानस्य धर्मजनकताधिकरणम् अवगच्छन्ति।

## शास्त्रनिर्माणरीतिमारभ्य ज्ञाने धर्मो उत प्रयोगे इति पर्यन्तम् ।

किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि किंचित् - 'ॐ' इत्युक्त्वा वृत्तान्तशः 'शम्' इत्येवमादीन् शब्दान्पठन्ति ?

पुराकल्प एतदासीत् - संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते, तेभ्यस्तत्तत्स्थान-करणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते । अद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति । 'वेदान्नो वैदिकाः शब्दाः सिद्धाः, लोकाच्च लौकिकाः, 'अनर्थकं व्याकरणम्' इति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्रमन्वाचष्टे - इमानि प्रयोजनान्यध्येयं व्याकरणम् - इति ॥

उक्तः शब्दः । स्वरूपमप्युक्तम् । प्रयोजनान्यप्युक्तानि ॥

प्रदीपः -

**३. शास्त्रनिर्माणरीतिनिरूपणाधिकरणम्**

शब्दानुशासनमिदानीं कर्तव्यम् । किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति?

उद्योतः -

अन्यतरोपदेशेन कृतं स्यात् । तद्यथा - भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते । 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतत् - अतोऽन्येऽभक्ष्या इति ॥ अभक्ष्यप्रतिषेधेन च भक्ष्यनियमः । तद्यथा - 'अभक्ष्यो ग्राम्यकुक्कुटः - अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतत् - आरण्यो भक्ष्य इति ॥

एवमिहापि। यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत् - गाव्यादयोऽपशब्दा इति । अथाप्यपशब्दोपदेशः क्रियेत, गाव्यादिषूपदिष्टेषु गम्यत एतत् - गौरित्येष शब्द इति ॥

किं पुनरत्र ज्यायः?

उद्योतः -

लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशः । गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा - गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिका - इत्येवमादयोऽपभ्रंशाः। इष्टान्वाख्यानं खल्वपि भवति ॥

उद्योतः -

अथैतस्मिञ्शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः - गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ?

प्रदीपः -

नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः ॥ एवं हि श्रूयते - 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्त्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम' ॥ बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्त्रमध्ययनकालः, न चान्तं जगाम ।

किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति - वर्षशतं जीवति । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति - आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति । तत्र चास्यागमकालेनैवायुः पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ॥

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः?

किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् ॥

किं पुनस्तत् ? उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः ॥

कथंजातीयकः पुनरुत्सर्गः कर्तव्यः, कथंजातीयकोऽपवादः?

प्रदीपः -

सामान्येनोत्सर्गः कर्तव्यः । तद्यथा - 'कर्मण्यण्'।

तस्य विशेषेणापवादः । तद्यथा - 'आतोऽनुपसर्गे कः' ॥

प्रदीपः -

उद्योतः -

## ४. जातिव्यक्तिपदार्थनिर्णयाधिकरणम्

किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम्?

उभयमित्याह ॥

कथं ज्ञायते?

उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा – 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इत्युच्यते । द्रव्यं पदार्थं मत्वा – 'सरूपाणाम् – ' इत्येकशेष आरभ्यते ॥

## ५. शब्दनित्यत्वानित्यत्वविचारः

किं पुनर्नित्यः शब्दः, आहोस्वित्कार्यः?

संग्रह एतत्प्राधान्येन परीक्षितम् - नित्यो वा स्यात्कार्यो वेति । तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि । तत्र त्वेष निर्णयः - यद्येव नित्यः, अथापि कार्यः, उभयथाऽपि लक्षणं प्रवर्त्यमिति ॥

## ६. शास्त्रस्य धर्मजनकताधिकरणम्

कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् ? ॥ * ॥ **सिद्धे शब्दार्थसंबन्धे** ॥ * ॥ सिद्धे शब्देऽर्थे संबन्धे चेति ॥

अथ सिद्धशब्दस्य कः पदार्थः?

नित्यपर्यायवाची सिद्धशब्दः ॥

कथं ज्ञायते? - यत्कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा - सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ॥

ननु च भोः कार्येष्वपि वर्तते । तद्यथा - सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति । यावता कार्येष्वपि वर्तते, तत्र कुत एतत् - नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति।

उद्योतः -

संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव ॥

उद्योतः -

अथवा सन्त्येकपदान्यप्यवधारणानि । तद्यथा अब्भक्षो वायुभक्ष इति, अप एव भक्षयति - वायुमेव भक्षयतीति गम्यते । एवमिहापि - सिद्ध एव, न साध्य इति ॥

अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः – अत्यन्तसिद्धः सिद्ध इति । तद्यथा - देवदत्तः - दत्तः, सत्यभामा भामेति ॥

अथवा 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः॥

किं पुनरनेन वर्ण्येन । किं न महता कण्ठेन नित्यशब्द एवोपात्तः, यस्मिन्नुपादीयमानेऽसंदेहः स्यात् ?

उद्योतः -

॥ **मङ्गलार्थम्** ॥

माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ॥

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते। किं तर्हि ? आभीक्ष्ण्येऽपि वर्तते । तद्यथा - नित्यप्रहसितो नित्यप्रजल्पित इति । यावता आभीक्ष्ण्येऽपि, तत्राप्यनेनैवार्थः स्यात् - 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति । पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति । अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः ॥

**७. नित्यतासाधकपक्षनिर्णयाधिकरणम्**

अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते - सिद्धे शब्दे अर्थे संबन्धे चेति ?

आकृतिमित्याह ॥

कुत एतत् ? आकृतिर्हि नित्या, द्रव्यमनित्यम् ॥

अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः ?

सिद्धे शब्दे अर्थसंबन्धे चेति । नित्यो ह्यर्थवतामर्थैरभिसंबन्धः ॥

अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः - सिद्धे शब्दे अर्थे संबन्धे चेति । द्रव्यं हि नित्यम्, आकृतिरनित्या ॥

कथं ज्ञायते?

एवं हि दृश्यते लोके - मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते ।

तथा - सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव । आकृत्युपमर्देन द्रव्यमेवावशिष्यते ॥

आकृतावपि पदार्थ एष विग्रहो न्याय्यः - सिद्धे शब्दे अर्थे संबन्धे चेति ॥

ननु चोक्तम् - आकृतिरनित्या - इति ॥

नैतदस्ति । नित्याऽऽकृतिः॥

कथम्?

न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति । द्रव्यान्तरस्था तूपलभ्यते ॥

अथवा नेदमेव नित्यलक्षणम् - ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत् तन्नित्यमिति ।

तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते ॥

किं पुनस्तत्त्वम् ?

तद्भावस्तत्त्वम् ॥ आकृतावपि तत्त्वं न विहन्यते ॥

अथवा किं न एतेन - इदं नित्यम् - इदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते - सिद्धे शब्देऽर्थे संबन्धे चेति ॥

कथं पुनर्ज्ञायते - सिद्धः शब्दोऽर्थः संबन्धश्चेति ?

**॥ * ॥ लोकतः॥ * ॥**

यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा - घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाऽऽह - कुरु घटं कार्यमनेन करिष्यामीति । न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽऽह - कुरु शब्दान्प्रयोक्ष्य इति । तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते ॥

## ८. धर्मनियमाधिकरणम्

यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते?

**॥ * ॥ लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ॥ * ॥**

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते ॥ किमिदं धर्मनियम इति? !

धर्माय नियमः - धर्मनियमः, धर्मार्थो वा नियमः - धर्मनियमः, धर्मप्रयोजनो वा नियमः - धर्मनियमः॥

**॥ * ॥ यथा लौकिकवैदिकेषु ॥ * ॥**

प्रियतद्धिता दाक्षिणात्याः । 'यथा लोके वेदे च' इति प्रयोक्तव्ये 'यथा लौकिकवैदिकेषु' इति प्रयुञ्जते ॥

अथवा - युक्त एव तद्धितार्थः। यथा लौकिकवैदिकेषु च कृतान्तेषु ॥

लोके तावत् - 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकरः' इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । तत्र नियमः क्रियते - इदं भक्ष्यम्, इदमभक्ष्यमिति ॥ तथा - खेदात्स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते - इयं गम्या - इयमगम्येति ॥

वेदे खल्वपि - 'पयोव्रतो ब्राह्मणः - यवागूव्रतो राजन्यः - आमिक्षाव्रतो वैश्यः' इत्युच्यते । व्रतं च नामाभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते । तथा - 'बैल्वः खादिरो वा यूपः स्यात्' इत्युच्यते । यूपश्च नाम पश्वनुबन्धार्थमुपादीयते ।

शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम् । तत्र नियमः क्रियते ।

तथा - 'अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते - भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम्' इति ।

अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति । तत्र च नियमः क्रियते । एवं

क्रियमाणमभ्युदयकारि भवतीति ॥

एवमिहापि समानायामर्थगतौ शब्देनापशब्देन च धर्मनियमः क्रियते - शब्देनैवार्थोऽभिधेयो

नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवतीति ॥

## ९. शब्दविषयप्रदर्शनाधिकरणम्

### ॥ अस्त्यप्रयुक्तः ॥

सन्ति वै शब्दा अप्रयुक्ताः। तद्यथा - ऊष, तेर, चक्र, पेच - इति ॥

किमतो यत्सन्त्यप्रयुक्ताः?

प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति । य इदानीमप्रयुक्ताः, नामी साधवः स्युः ॥

इदं तावद्विप्रतिषिद्धम् - यदुच्यते - 'सन्ति वै शब्दाः, अप्रयुक्ताः' इति ।

यदि सन्ति, नाप्रयुक्ताः।

अथाप्रयुक्ताः, न सन्ति । सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह - सन्ति शब्दा अप्रयुक्ता इति । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ?

नैतद्विप्रतिषिद्धम् । सन्तीति तावद्ब्रूमः, यदेताञ्शास्त्रविदः शास्त्रेणानुविदधते ॥

अप्रयुक्ता इति ब्रूमः, यल्लोकेऽप्रयुक्ता इति ॥

यदप्युच्यते - 'कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्' इति ।

न ब्रूमोऽस्माभिरप्रयुक्ता इति ।

किं तर्हि ?

लोकेऽप्रयुक्ता इति ॥

उद्योतः -

ननु च भवानप्यभ्यन्तरो लोके ॥

अभ्यन्तरोऽहं लोके, न त्वहं लोकः ॥

**॥ * ॥ अस्त्यप्रयुक्त इति चेत् नार्थे शब्दप्रयोगात् ॥ * ॥**

अस्त्यप्रयुक्त इति चेत्, तन्न ।

किं कारणम् ?

'अर्थे शब्दप्रयोगात्' अर्थे शब्दाः प्रयुज्यन्ते । सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते ॥

**॥ * ॥ अप्रयोगः प्रयोगान्यत्वात् ॥ * ॥**

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः।

कुतः? '

'प्रयोगान्यत्वात्' । यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते । तद्यथा - 'ऊष' इत्यस्य शब्दस्यार्थे - क्व यूयमुषिताः, 'तेर' इत्यस्यार्थे - क्व यूयं तीर्णाः, 'चक्र' इत्यस्यार्थे - क्व यूयं कृतवन्तः। 'पेच' इत्यस्यार्थ - क्व यूयं पक्वन्त इति ॥

**॥ * ॥ अप्रयुक्ते दीर्घसत्त्रवत् ॥ * ॥**

यद्यप्यप्रयुक्ताः, अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः। तद्यथा - दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च, न चाद्यत्वे कश्चिदप्याहरति। केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ॥

## ॥ * ॥ सर्वे देशान्तरे ॥ * ॥

सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते ॥

चैवोपलभ्यन्ते ॥

उपलब्धौ यत्नः क्रियताम् ॥ महान् शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः - एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाऽऽथर्वणो वेदः, वाकोवाक्यम् , इतिहासः, पुराणं, वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य 'सन्त्यप्रयुक्ताः' इति वचनं केवलं साहसमात्रमेव ॥

एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते - शव इति । हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु॥

ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते ॥

क्व?

वेदे। तद्यथा - 'यद्वो रेवतीरेवत्यन्तमूष, यन्मे नरः श्रुत्यं ब्रह्म चक्र, यत्रा नश्चक्रा जरसं तनूनाम्' इति ॥

प्रदीपः -

उद्योतः -

**१०. शब्दज्ञानस्य धर्मजनकताधिकरणम्**

किं पुनः - शब्दस्य ज्ञाने धर्मः, आहोस्वित्प्रयोगे?

कश्चात्र विशेषः?

**॥*॥ ज्ञाने धर्म इति चेत्तथाऽधर्मः ॥*॥**

ज्ञाने धर्म इति चेत्तथाऽधर्मः प्राप्नोति । यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः ॥

अथवा भूयानधर्मः प्राप्नोति । भूयांसो ह्यपशब्दाः, अल्पीयांसः शब्दाः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा - गौरित्यस्य गावी - गोणी - गोता - गोपोतलिकेत्येवमादयोऽपभ्रंशाः ॥

**॥ * ॥ आचारे नियमः ॥ * ॥**

आचारे पुनर्ऋषिर्नियमं वेदयते - 'तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः' इति ॥

अस्तु तर्हि प्रयोगे॥

॥ * ॥ **प्रयोगे सर्वलोकस्य** ॥ * ॥

यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत ॥

कश्चेदानीं भवतो मत्सरः, यदि सर्वो लोकोऽभ्युदयेन युज्येत?

न खलु कश्चिन्मत्सरः । प्रयत्नानर्थक्यं तु भवति । फलवता च नाम यत्नेन भवितव्यम् । न च प्रयत्नः फलाद्व्यतिरेच्यः॥

ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते, अत एव साधीयोऽभ्युदयेन योक्ष्यन्ते ॥

प्रदीपः -

व्यतिरेकोऽपि वै लक्ष्यते । दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ॥

एवं तर्हि - नापि ज्ञान एव धर्मः, नापि प्रयोग एव ॥ किं तर्हि ?

**॥ * ॥ शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥ * ॥**

शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। 'तत्तुल्यं वेदशब्देन' । वेदशब्दा अप्येवमभिवदन्ति - 'योऽग्निष्टोमेन यजते य उ चैनमेवं वेद', 'योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद' ॥

अपर आह - तत्तुल्यं वेदशब्देन - इति । यथा - वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति, एवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ॥

उद्योतः -

अथ वा पुनरस्तु

ज्ञान एव धर्म इति ॥

ननु चोक्तम् - *ज्ञाने धर्म इति चेत्तथाऽधर्मः* इति ॥

नैष दोषः, शब्दप्रमाणका वयम् , यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम् ॥ यच्च पुनरशिष्टाप्रतिषिद्धम्, नैव तद्दोषाय भवति, नाभ्युदयाय। तद्यथा - हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय ॥

प्रदीपः -

अथवाऽभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने । यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति । तदेवं 'ज्ञाने धर्मः' इति ब्रुवतोऽर्थादापन्नं भवति - 'अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः' इति ॥

अथवा कूपखानकवदेतद्भविष्यति । तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांशुभिश्चावकीर्णो भवति सोऽप्सु संजातासु तत एव तं गुणमासादयति, येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति ॥ एवमिहापि यद्यपशब्दज्ञानेऽधर्मः, तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते, भूयसा चाभ्युदयेन योगो भविष्यति ॥

यदप्युच्यते - *आचारे नियमः* इति । याज्ञे कर्मणि स नियमः, अन्यत्रानियमः । एवं हि श्रूयते - 'यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः।' ते तत्रभवन्तः 'यद्वा नः' 'तद्वा नः' इति प्रयोक्तव्ये 'यर्वाणः - तर्वाणः' इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते ॥ तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम् , ततस्ते पराभूताः ॥

# खण्डः ग

## पाठसंरचना

प्रस्तावना

उद्देशयम्

व्याकरणाधिकारात् इति आरभ्य आह्निकसमाप्तिपर्यन्तम्

बोधप्रश्नाः

शब्दावली

अभ्यासप्रश्नाः

सन्दर्भग्रन्थाः

सहायकग्रन्थाः

**प्रस्तावना-**

अस्मिन् खण्डे सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः, शब्दाप्रतिपत्तिः, शब्दे ल्युडर्थः, भवे च तद्धितः, प्रोक्तादयश्च तद्धिताः, लक्ष्यलक्षणे व्याकरणम्, वर्णोपदेशाधिकरणम्, वृत्तिसमवायार्थ उपदेशः, अनुबन्धकरणार्थश्च, इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिक-दीर्घप्लुतानामप्युपदेशः, आकृत्युपदेशात्सिद्धम्, आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः, लिङ्गार्था तु प्रत्यापत्तिः इत्यादिविषयाः निरूपिताः सन्ति।

**उद्देश्यम्-**

1. व्याकरणे षष्ठ्यर्थोऽनुपपन्नः कथं भवति इति छात्राः ज्ञास्यन्ति।
2. भवे च तद्धितः, प्रोक्तादयश्च तद्धिताः इति कथं न सिध्यति इति छात्राः अवगच्छन्ति।
3. अनुबन्धकरणार्थश्च वर्णानामुपदेशः कथमिति छात्राः ज्ञाष्यन्ति।
4. आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः इत्यवगच्छन्ति।

## व्याकरणाधिकरणम्

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः? सूत्रम् ॥

**॥*॥ सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः॥*॥**

सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते - 'व्याकरणस्य सूत्रम्' इति ॥ किं हि तदन्यत्सूत्रात् व्याकरणं यस्यादः

सूत्रं स्यात् ?

**॥ * ॥ शब्दाप्रतिपत्तिः ॥ * ॥**

शब्दानां चाप्रतिपत्तिः प्राप्नोति - 'व्याकरणाच्छब्दान्प्रतिपद्यामहे' इति । न हि सूत्रत एव

शब्दान्प्रतिपद्यन्ते।

किं तर्हि ? व्याख्यानतश्च ॥

ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति ॥

न केवलं चर्चापदानि व्याख्यानम् - 'वृद्धिः, आत्, ऐच्' इति ।

किं तर्हि ?

उदाहरणं - प्रत्युदाहरणं - वाक्याध्याहारः - इत्येतत्समुदितं व्याख्यानं भवति ॥

एवं तर्हि शब्दः।

प्रदीपः -

**॥ * ॥ शब्दे ल्युडर्थः ॥ * ॥**

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते - व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् । न हि शब्देन किंचित् व्याक्रियते। केन तर्हि ? सूत्रेण ॥

**॥ * ॥ भवे च तद्धितः॥ * ॥**

भवे च तद्धितो नोपपद्यते - व्याकरणे भवो योगो वैयाकरणः - इति । नहि शब्दे भवो योगः। क्व तर्हि? सूत्रे॥

उद्योतः -

**॥ * ॥ प्रोक्तादयश्च तद्धिताः॥ * ॥**

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते । पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलं, काशकृत्स्नमिति । न हि पाणिनिना शब्दाः प्रोक्ताः । किं तर्हि ? सूत्रम् ॥

किमर्थमिदमुभयमुच्यते - * भवे - प्रोक्तादयश्च तद्धिताः* इति । न *प्रोक्तादयश्च तद्धिताः* इत्येव भवेऽपि तद्धितश्चोदितः स्यात् ?

पुरस्तादिदमाचार्येण दृष्टम् - *भवे च तद्धितः* इति, तत्पठितम् । तत उत्तरकालमिदं दृष्टम् - *प्रोक्तादयश्च तद्धिताः* इति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥

अयं तावददोषः - यदुच्यते *शब्दे ल्युडर्थः* इति । नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते । किं तर्हि ? अन्येष्वपि कारकेषु - 'कृत्यल्युटो बहुलम्' इति । तद्यथा - प्रस्कन्दनं प्रपतनमिति ॥

उद्योतः -

अथवा शब्दैरपि शब्दा व्याक्रियन्ते । तद्यथा गौरित्युक्ते सर्वे संदेहा निवर्तन्ते, नाश्वो न गर्दभ इति ॥

अयं तर्हि दोषः - * 'भवे - प्रोक्तादयश्च तद्धिताः'* इति॥

एवं तर्हि –

**॥ * ॥ लक्ष्यलक्षणे व्याकरणम् ॥ * ॥**

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति॥ किं पुनर्लक्ष्यम्, किं लक्षणम्? शब्दो लक्ष्यः, सूत्रं लक्षणम् ॥

प्रदीपः -

एवमप्ययं दोषः - समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते । सूत्राणि चाप्यधीयान इष्यते - वैयाकरण इति ॥

नैष दोषः । समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते । तद्यथा - पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम् , घृतं भुक्तम्, शुक्लो नीलः कृष्ण इति ॥ एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेऽपि वर्तते ॥

अथ वा पुनरस्तु सूत्रम् ॥

ननु चोक्तम् - *सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः* इति ॥

नैष दोषः। व्यपदेशिवद्भावेन भविष्यति ॥

यदप्युच्यते - *'शब्दाप्रतिपत्तिः'*इति ।

न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते । किं तर्हि ? व्याख्यानतश्च - इति।

परिहृतमेतत् - तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ॥

ननु चोक्तम् - 'न केवलानि चर्चापदानि व्याख्यानम् - वृद्धिः - आत् - ऐजिति । किं तर्हि ? उदाहरणं - प्रत्युदाहरणं - वाक्याध्याहारः - इत्येतत्समुदितं व्याख्यानं भवति' इति ॥

अविजानत एतदेवं भवति । सूत्रत एव हि शब्दान् प्रतिपद्यन्ते ॥ आतश्च सूत्रत एव । यो ह्युत्सूत्रं कथयेन्नादो गृह्येत ॥

## १२. वर्णोपदेशाधिकरणम्

अथ किमर्थो वर्णानामुपदेशः?

### ॥ * ॥ वृत्तिसमवायार्थ उपदेशः ॥ * ॥

वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्यः।

किमिदं वृत्तिसमवायार्थ इति?

वृत्तये समवायः - वृत्तिसमवायः । वृत्त्यर्थो वा समवायः - वृत्तिसमवायः। वृत्तिप्रयोजनो वा समवायः - वृत्तिसमवायः॥

का पुनर्वृत्तिः? शास्त्रप्रवृत्तिः ॥

अथ कः समवायः? वर्णानामानुपूर्व्येण संनिवेशः॥

अथ क उपदेशः? उच्चारणम् ॥

कुत एतत् ? दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाह - उपदिष्टा इमे वर्णा इति ॥

### ॥ * ॥ अनुबन्धकरणार्थश्च ॥ * ॥

अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्तव्यः । अनुबन्धानासङ्क्ष्यामीति । न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम् ॥ स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः ॥

इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः।

'इष्टान्वर्णान् भोत्स्यामहे' इति । न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम् ॥

**॥ * ॥ इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ॥ * ॥**

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः । एवंगुणा अपि हि वर्णा इष्यन्ते ॥

**॥ * ॥ आकृत्युपदेशात्सिद्धम् ॥ * ॥**

आकृत्युपदेशात्सिद्धमेतत् । अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः। तथोवर्णाकृतिः ॥

**॥ * ॥ आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ॥ * ॥**

आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः॥

के पुनः संवृतादयः ?

संवृतः, कलः, ध्मातः, एणीकृतः, अम्बूकृतः, अर्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, क्ष्विण्णः,

रोमशः - इति ॥

अपर आह -

'ग्रस्तं निरस्तमवलम्बितं निहतमम्बूकृतं ध्मातमथो विकम्पितम्।

संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः ॥' इति ।

अतोऽन्ये व्यञ्जनदोषाः॥

नैष दोषः।

गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति॥

प्रदीपः -

अस्त्यन्यत् गर्गादिबिदादिपाठे प्रयोजनम् ॥

किम् ?

समुदायानां साधुत्वं यथा स्यादिति ॥

एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि ॥<

सा तर्हि वक्तव्या ॥

प्रदीपः -

**॥ * ॥ लिङ्गार्था तु प्रत्यापत्तिः॥ * ॥**

लिङ्गार्था सा तर्हि भवति ॥

प्रदीपः -

तत्तर्हि वक्तव्यम् ॥

यद्यप्येतदुच्यते, अथवैतर्हि अनेकमनुबन्धशतं नोच्चार्यम्, इत्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः ।

यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते ॥

सिध्यत्येवम् । अपाणिनीयं तु भवति ॥

प्रदीपः -

यथान्यासमेवास्तु ॥

ननु चोक्तम् - *आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः* इति ॥

परिहृतमेतत् - गर्गादिबिदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति - इति॥

ननु चान्यत् गर्गादिबिदादिपाठे प्रयोजनमुक्तम् ।

किम् ?

समुदायानां साधुत्वं यथा स्यादिति ॥

एवं तर्ह्युभयमनेन क्रियते - पाठश्चैव विशेष्यते, कलादयश्च निवर्त्यन्ते ॥

कथं पुनरेकेन यत्नेनोभयं लभ्यम् ?

लभ्यमित्याह ।

द्विगता अपि हेतवो भवन्ति । तद्यथा - आम्राश्च सिक्ताः पितरश्च प्रीणिता इति । तथा वाक्यान्यपि द्विष्ठानि भवन्ति - श्वेतो धावति, अलम्बुसानां यातेति ॥

अथवा - इदं तावदयं प्रष्टव्यः - क्वेमे संवृतादयः श्रूयेरन्निति?

आगमेषु ।

आगमाः शुद्धाः पठ्यन्ते ॥

विकारेषु तर्हि ।

विकाराः शुद्धाः पठ्यन्ते ॥

प्रत्ययेषु तर्हि ।

प्रत्ययाः शुद्धाः पठ्यन्ते ॥

धातुषु तर्हि ।

धातवोऽपि शुद्धाः पठ्यन्ते ॥

प्रातिपदिकेषु तर्हि।

प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते ॥

यानि तर्ह्यग्रहणानि प्रातिपदिकानि ।

एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः । शशः षष इति मा भूत् । पलाशः पलाष इति मा

भूत् । मञ्चको मञ्जक इति मा भूत् ॥

'आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।

उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ॥ १॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये

प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

**अवबोधप्रश्नाः-**

1. व्याकरणमहाभाष्यस्य रचयिता कः?
2. किमर्थः वर्णानामुपदेशः?
3. वृत्तिसमवायार्थः इत्यत्र समासः कथं विवेचयत?
4. षष्ठ्यर्थः कुतो नोपपद्यते?

# खण्डः - घ

## पाठसंरचना

प्रस्तावना

उद्देशयम्

निरुक्तम्(द्वितीयपादपर्यन्तम्)

बोधप्रश्नाः

शब्दावली

अभ्यासप्रश्नाः

सन्दर्भग्रन्थाः

सहायकग्रन्थाः

## प्रस्तावना

यास्कः निरुक्तस्य प्रारम्भं 'समाम्नायः समाम्नातः' इति वाक्येन करोति । अत्र समाम्नायशब्दस्यार्थः वैदिकपदसमुदायो वर्तते । वैदिकसंहिताभ्यः शब्दान् सङ्गृह्य तेषां व्याख्यानमत्र

क्रियते । समाम्नाय एव निघण्टुशब्देनोच्यते । मन्त्रार्थबोधकत्वादेव समाम्नायस्य निघण्टुत्वम् । छन्दोभ्यः समाहृत्य समाहृत्य इमे समाम्नाता वर्तन्ते।

तच्च निरुक्तं वेदपुरुषस्य श्रोत्राङ्गत्वेन प्रसिद्धमस्ति। यथोक्तम्-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**

**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं**

**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

इदं च निरुक्तं त्रिधा विभक्तं भवति तद्यथा- निघण्टुकाण्डम्, नैगमकाण्डम, दैवतकाण्डमिति। अत्र पाठ्यांशे निघण्टुकाण्डमेवस्ति।

**उद्देश्यम्-**

1. निरुक्तस्यस्याध्ययनेन छात्राः वैदिकशब्दानाम्  अर्थं ज्ञास्यन्ति ।
2. नामोपसर्ग-आख्यातनिपातानां विषये छात्राः ज्ञस्यन्ति।
3. उपसर्गानाम् अर्थविषयकं ज्ञानं भविष्यति।
4. निपातविषयकं ज्ञानं भविष्यति।

## निरूक्तम्, निघण्टुकाण्डम्(द्वितीयपादपर्यन्तम्)

### प्रथमः पादः

समाम्नायः समाम्नातः । सः व्याख्यातव्यः । तमिमं समाम्नायम् "निघण्टवः" इति आचक्षते । निघण्टवः कस्मात् ? निगमाः इमे भवन्ति- छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः । ते निगन्तवः एव सन्तः निगमनात् निघण्टवः उच्यन्ते इति औपमन्यवः। अपि वा आहननाद् एव स्युः । समाहताः भवन्ति ।

यत् वा समाहृताः भवन्ति । तत् यानि चत्वारि पदजातानि नामाख्याते च उपसर्गनिपाताः च तानि इमानि भवन्ति। तत्र एतत् नामाख्यातयोः लक्षणं प्रदिशन्ति । भावप्रधानम् आख्यातम् । सत्त्वप्रधानानि नामानि । तत् यत्र उभे भावप्रधाने भवतः पूर्वापरीभूतं भावम् आख्यातेन आचष्टे । व्रजति पचति इति । उपक्रमप्रभृति अपवर्गपर्यन्तं मूर्तम् सत्त्वभूतं सत्त्वनामभिः । व्रज्या पक्तिः इति । अदः इति सत्त्वानाम् उपदेशः । गौः अश्वः पुरुषः हस्ती इति । भवति इति भावस्य । आस्ते शेते व्रजति तिष्ठति इति । इन्द्रिय- नित्यं वचनम् औदुम्बरायणः ।

तत्र चतुष्ट्वं न उपपद्यते । अयुगपत् उत्पन्नानां वा शब्दानाम् इतरेतरोपदेशः । शास्त्रकृतः योगः च । व्याप्तिमत्त्वात् तु शब्दस्य अणीयस्त्वात् च शब्देन संज्ञाकरणं व्यवहारार्थं लोके । तेषां मनुष्यवत् देवताभिधानम् । पुरुषविद्यानित्यत्वात् कर्मसंपत्तिः मन्त्रः वेदे । षट् भावविकाराः भवन्ति इति वार्ष्यायणिः । जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यति इति । जायते इति पूर्वभावस्य

आदिम् आचष्टे । न अपरभावम् आचष्टे न प्रतिषेधति । अस्ति इति उत्पन्नस्य सत्त्वस्य अवधारणम् । विपरिणमते इति अप्रच्यवमानस्य तत्त्वात् विकारम् । वर्धते इति स्वाङ्गाभ्युच्चयम् । सांयौगिकानां वा अर्तानाम् । वर्धते विजयेन इति वा । वर्धते शरीरेण इति वा । अपक्षीयते इति एतेन एव व्याख्यातः प्रतिलोमम् । विनश्यति इति अपरभावस्य आदिम् आचष्टे । न पूर्वभावम् आचष्टे न प्रतिषेधति।

अतः अन्ये भावविकाराः एतेषाम् एव विकाराः भवन्ति इति ह स्माह । ते यथावचनम् अभ्यूहितव्याः । न निर्बद्धाः उपसर्गाः अर्थान् निराहुः इति शाकटायनः । नामाख्यातयोः तु कर्मोपसंयोगद्योतकाः भवन्ति । उच्चावचाः पदार्थाः भवन्ति इति गार्ग्यः । तत् यः एषु पदार्थः प्राहुः इमे तन्नामाख्यातयोः अर्थविकरणम् ।

आ इति अर्वागर्थे । प्र परा इति एतस्य प्रातिलोम्यम् । अभि इति आभिमुख्यम्। प्रति इति एतस्य प्रातिलोम्यम् । अति सु इति अभिपूजितार्थे ।निः दुः इति एतयोः प्रातिलोम्यम् । नि अव इति विनिग्रहार्थीया। उत् इति एतयोः प्रातिलोम्यम् । सम् इति एकीभावम् । वि अप इति एतस्य प्रातिलोम्यम्। अनु इति सादृश्यापरभावम्। अपि इति संसर्गम्। उप इति उपजनम्। परि इति सर्वतोभावम्। अधि इति उपरिभावम् ऐश्वर्यं वा । एवम् उच्चावचान् अर्थान् प्राहुः। ते उपेक्षितव्याः।

## द्वितीयः पादः

अथ निपाताः उच्चावचेषु अर्थेषु निपतन्ति । अपि उपमार्थे । अपि कर्मोपसंग्रहार्थे । अपि पदपूरणाः । तेषाम् एते चत्वारः उपमार्थे भवन्ति ।

इव इति भाषायां च। अन्वध्यायं च । अग्निः इव । “इन्द्र इव” इति । न इति प्रतिषेधार्थीयः भाषायाम्। उभयम् अन्वध्यायम्। इन्द्रं देवम् अमंसत। इति प्रतिषेधार्थीयः । पुरस्तात् उपाचारः तस्य यत् प्रतिषेधति। दुर्मदासः न सुरायाम् । इति उपमार्थीयः। उपरिष्टात् उपाचारः तस्य येन उपमिमीते।

चित् इति एषः अनेककर्मा। आचार्यः चित् इदं ब्रूयात् इति पूजायाम्। [ आचार्यः कस्मात् ] आचार्यः आचारं ग्राहयति। आचिनोति अर्थान्। आचिनोति बुद्धिम् इति वा। दधि चित् । इति उपमार्थे । कुल्माषान् चित् आहार । इति अवकुत्सिते । कुल्माषाः कुलेषु सीदन्ति । नु इति एषः अनेककर्मा । इदं करिष्यति । इति हेत्वपदेशे । कथं नु करिष्यति । इति अनुपृष्टे। ननु एतत् अकार्षीत् । इति च । अथ अपि उपमार्थे भवति । वृक्षस्य नु ते पुरुहूत वयाः। वृक्षस्य इव ते पुरुहूत शाखाः । वयाः शाखाः वेतेः । वातायनाः भवन्ति । शाखाः खशयाः । शक्नोतेः वा।

अथ यस्य आगमात् अर्थपृथक्त्वम् अह विज्ञायते न तु औद्देशिकम् इव विग्रहे पृथक्त्वात् सः कर्मोपसंग्रहः ।

च इति समुच्चयार्थे उभाभ्यां संप्रयुज्यते । अहं च त्वं च वृत्रहन् । इति ।एतस्मिन् एव अर्थे । देवेभ्यः च पितृभ्यः आ । इति आकारः । वा इति विचारणार्थे । हन्त अहं पृथिवीम् इमां नि दधानि इह वा इह वा इति। अथ अपि समुच्चयार्थे भवति ।

वायुः वा त्वा मनुः वा त्वा । इति । अह इति च ह इति च विनिग्रहार्थीया । पूर्वेण संप्रयुज्येते । अयम् अह इदं करोतु अयम् इदम् । इदं ह करिष्यति इदं न करिष्यति इति । अथ अपि उकारः

एतस्मिन् एव अर्थे उत्तरेण । मृषा इमे वदन्ति सत्यम् उ ते वदन्ति इति । अथ अपि पदपूरणः । इदम् उ । तत् उ ।

हि इति एषः अनेककर्मा। इदं हि करिष्यति। इति हेत्वपदेशे। कथं हि करिष्यति। इति अनुपृष्टे। कथं हि व्याकरिष्यति। इति असूयायाम्। किल इति विद्याप्रकर्षे। एवं किल इति । अथ अपि न ननु इति एताभ्यां संप्रयुज्यते अनुपृष्टे । न किल एवम् । ननु किल एवम् । मा इति प्रतिषेधे । मा कार्षीः । मा हार्षीः इति च। खलु इति च। खलु कृत्वा । खलु कृतम् । अथ अपि पदपूरणः । एवं खलु तत् बभूव इति।

शश्वत् इति विचिकित्सार्थीयः भाषायाम् "शश्वत् एवम्" इति अनुपृष्टे । एवं शश्वत् । इति अस्वयं पृष्टे । नूनम् इति विचिकित्सार्थीयः भाषायाम् । उभयम् अन्वध्यायम्। विचिकित्सार्थीयः च पदपूरणः च। अगस्त्यः इन्द्राय हविः निरूप्य मरुद्भ्यः संप्रदित्सांचकार।सः इन्द्रः एत्य परिदेवयां चक्रे ।

पाठस्य सारांशः-

यास्कः निरुक्तस्य प्रारम्भं 'समाम्नायः समाम्नातः' इति वाक्येन करोति । अत्र समाम्नायशब्दस्यार्थः वैदिकपदसमुदायो वर्तते । वैदिकसंहिताभ्यः शब्दान् सङ्गृह्य तेषां व्याख्यानमत्र

क्रियते । समाम्नाय एव निघण्टुशब्देनोच्यते । मन्त्रार्थबोधकत्वादेव समाम्नायस्य निघण्टुत्वम् ।
छन्दोभ्यः समाहृत्य समाहृत्य इमे समाम्नाता वर्तन्ते ।

एतदनन्तरं यास्कः नामाख्यातोपसर्गनिपाताख्यानां चतुर्णां पदभेदानां वर्णनं करोति । इमानेव पदभेदान् वैयाकरणा अपि स्वीकुर्वन्ति। तत्र भाव- प्रधानमाख्यातं सत्त्वप्रधानानि नामानि च भवन्ति । परन्तु यास्कः उपसर्ग- निपातयोः लक्षणं नहि करोति । यास्कमतानुसारेण विंशति उपसर्गाः भवन्ति ।

एतदनन्तरं यास्कः औदुम्बरायणस्य मतमुपस्थाप्य शब्दस्यानित्यत्वं स्वीकरोति । औदुम्बरायणः शब्दस्य सत्ताम् इन्द्रियाणि यावत् स्वीकरोति । यास्कमतानुसारेण शब्दैरेव वस्तूनां नामकरणं भवति। शब्दाः व्यापकाः वस्तुबोधसाधनेषु सरलतराश्च सन्ति । शब्दः औदुम्बरमतानुसारेणानित्यः यास्कमतानुसारेण च नित्योऽस्ति । यास्को वक्ति यत् येन नाम्ना यद् वस्तु ज्ञायते तेनैव नाम्ना तद् वस्तु देवैरपि ज्ञायते ।

तदनन्तरं यास्को वक्ति यत् जातानां समेषां वस्तूनां षड् भावविकारा भवन्ति । ते च विकाराः अस्ति, जायते, वर्द्धते, परिणमते, अपक्षीयते विनश्यतीति सन्ति । एतद्व्यतिरिक्तानां समेषां विकाराणामेष्वेवान्तर्भावो भवति । शाकटायनमतानुसारेण उपसर्गाः स्वतन्त्ररूपेणार्थबोधकाः नहि

भवन्ति। नामाख्याताभ्यां संयुक्तास्ते नामाख्यातयोरर्थान् नैकधा परिवर्तयन्ति, इति उपसर्गाणां कांश्चन अर्थान् निदिशति ।

द्वितीये पादे यास्कः निपातानां वर्णनं करोति। उच्चावचेष्वर्थेषु निपतन्ति इति निपातशब्दस्यार्थं करोति यास्कः । यास्कानुसारेण निपाताः त्रिप्रकारका उपमार्थकाः, कर्मोपसङ्ग्रहार्थकाः पादपूरणाश्च।

# खण्डः ङ

**प्रस्तावना**

अन्तिमे खण्डे तृतीये पादे यास्कः निपातानामर्थनिर्णयं करोति । परन्तु इमे त्रय एव भेदा निपातानां भवन्ति इति वक्तुं न शक्यते । उपमार्थकाः अपि निपाताः पादपूरणा भवितुमर्हन्ति, ते कर्मोपसङ्ग्रहाः भवितुमर्हन्ति। चतुर्थे पादे शब्दानां धातुजत्वं सिद्धान्तं वर्णयति यास्कमतानुसारेण सर्वे शब्दाः धातुजाः। इममेव सिद्धान्तं पोषयितुं निरुक्तस्य रचना प्रतीयते।

**उद्देश्यम्-**

1. नामानि आख्यातजानि इति केषां मतं न इति केषां इत्याविषयान् ज्ञास्यन्ति।
2. पदजातानि कति इत्यादिविषयकं ज्ञानं भविष्यति।
3. सीम इत्यादीनां प्रयोगः कस्मिन् कस्मिन् अर्थे अस्ति इति ज्ञायते।
4. नरकं नि अरक। नीचैः गमनम् इत्यादिव्युत्पत्तिज्ञानं भविष्यति।

**निरुक्तम्, निघण्टुकाण्डम्**

**तृतीयपादात् पञ्चमपादपर्यन्तम्**

**न नूनम् अस्ति नो श्वः कः तत् वेद यत् अद्भुतम्।**

**अन्यस्य चित्तम् अभि संचरेण्यम् उत आधीतं विनश्यति।**

न नूनम् अस्ति अद्यतनम्। नो एव श्वस्तनम्। अद्य अस्मिन्= द्यवि। "द्युः" इत्यह्नो नामधेयम्। द्योतते इति सतः। श्वः उपाशंसनीयः कालः। हः हीनः कालः। कः तत् वेद यत् अद्भुतम्। कः तत् वेद यत् अभूतम्। इदम् अपि इतरत् अद्भुतम् अभूतम् इव। अन्यस्य चित्तम्। अभिसंचरेण्यम् संचारि । अन्यः न आनेयः । चित्तं चेततेः । उत आधीतं विनश्यति इति [ अपि आध्यातं विनश्यति ] आध्यातम् अभिप्रेतम् ।अथ अपि पदपूरणः ।

**नूनं सा प्रति वरं जरित्रे दुहीयत् इन्द्र दक्षिणा मघोनी ।**

**शिक्ष स्तोतृभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ।**

सा ते प्रतिदुग्धां वरं जरित्रे। वरः वरयितव्यः भवति। जरिता = गरिता। दक्षिणा। मघोनी = मघवती। मघम् इति धननामधेयम्। मंहतेः दानकर्मणः। दक्षिणा दक्षतेः समर्धयतिकर्मणः । व्यृद्धं समर्धयति इति । अपि वा प्रदक्षिणागमनात् । दिशम् अभिप्रेत्य । दिग्घस्तप्रकृतिः कक्षिणः हस्तः । दक्षतेः उत्साहकर्मणः । दाशतेः वा स्यात् दानकर्मणः। हस्तः हन्तेः । प्राशुः हनने ।

देहि स्तोतृभ्यः कामान्। मा अस्मान् अतिदंहीः। मा अस्मान् अतिहाय दाः। भगः नः अस्तु।

बृहत् वदेम स्वे वेदने। भगः भजतेः । बृहत् इति महतः नामधेयम् । परिवृढं भवति । वीरवन्तः कल्याणवीराः वा। वीरः वीरयति अमित्रान् । वेतेः वा स्यात् गतिकर्मणः वीरयतेः वा ।

सीम् इति प्ररिग्रहार्थीयः वा पदपूरणः वा । प्र सीम् आदित्यः असृजत् । प्रासृजत् इति वा। प्रासृजत् सर्वतः इति वा। वि सीमतः सुरुचः वेनः आवः। इति च। व्यवृणोत् सर्वतः आदित्यः। सुरुचः आदित्यरश्मयः। सुरोचनात्। अपि वा सीमा इति एतत् अनर्थकम् उपबन्धम् आददीत पंचमीकर्माणम्। सीम्नः सीमतः सीमातः मर्यादातः। सीमा मर्यादा। विषीव्यति देशौ इति। त्वः इति विनिग्रहार्थीयम्। सर्वनाम अनुदात्तम्। अर्धनाम इति एके ।

**ऋचां त्वः पोषम् आस्ते पुपुष्वान् गायत्रं त्वः गायति शक्करीषु।**

**ब्रह्मा त्वः वदति जातविद्यां यज्ञस्य मात्रां वि मिमीते उ त्वः।**

इति ऋत्विक् कर्मणां विनियोगम् आचष्टे। ऋचाम् एकः पोषम् आस्ते पुपुष्वान् - होता। ऋक् = अर्चनी । गायत्रम् एकः गायति शक्रीषु - उद्गाता । गायत्रं गायतेः स्तुतिकर्मणः । शक्वर्यः ऋचः शक्नोतेः। तत् यत् आभिः वृत्रम् अशकत् हन्तुं तत् शक्करीणां शक्करीत्वम् इति विज्ञायते।

ब्रह्मा एकः जाते जाते विद्यां वदति । ब्रह्मा सर्वविद्यः । सर्वं वेदितुम् अर्हति । ब्रह्मा परिवृढः श्रुततः। ब्रह्म परिवृढः सर्वतः। यज्ञस्य मात्रां विमिमीते एकः अध्वर्युः। अध्वर्युः = अध्वरयुः। अध्वरं युनक्ति । अध्वरस्य नेता । अध्वरं कामयते इति वा । अपि वा अधीयाने युः उपबन्धः। अध्वरः इति यज्ञनाम। ध्वरतिः हिंसाकर्मा।

तत्प्रतिषेधः। निपातः इति एके । तत् कथम्। अनुदात्तप्रकृति नाम स्यात्? दृष्टव्ययं तु भवति। उत त्वं सख्ये स्थिरपीतम् आहुः। इति द्वितीयायाम् । उतो त्वस्मै तन्वावि सस्रे इति चतुर्थ्याम्। अथ अपि प्रथमाबहुवचने।

**अक्षण्वन्तः कर्णवन्तः सखायः मनोजवेषु असमाः बभूवुः ।**

**आदघ्नासः उपकक्षासः उ त्वे ह्रदाः इव स्नात्वाः उ त्वे ददृश्रे।।**

अक्षिमन्तः कर्णवन्तः सखायः "अक्षि चष्टेः"। अनक्तेः इति आग्रायणः। तस्मात् एते व्यक्ततरे इव भवतः। इति ह विज्ञायते । कर्णः कृन्ततेः । निकृतद्वारः भवति । ऋच्छतेः इति आग्रायणः । ऋच्छन्ति इव खे उदगन्ताम् इति ह विज्ञायते ।

मनसां प्रजवेषु असमाः बभूवुः। आस्यदघ्नाः अपरे। उपकक्षदघ्नाः अपरे । आस्यम् अस्यतेः । आस्यन्दते एनत् अन्नम् इति वा । दघ्नं दध्यतेः स्रवतिकर्मणः। दस्यतेः वा स्यात् । विदस्ततरं भवति।

प्रस्नेयाः= ह्रदाः इव एके दद्दशिरे। स्नानार्हाः। ह्रदः ह्रादतेः शब्दकर्मणः। ह्लादतेः वा स्यात् शीतीभावकर्मणः।

अथ अपि समुच्चयार्थे भवति । पर्यायाः इव त्वत् आश्विनम् । आश्विनं च पर्यायाः च इति । अथ ये प्रवृत्ते अर्थे अमिताक्षरेषु ग्रन्थेषु वाक्यपूरणाः आगच्छन्ति पदपूरणाः ते मिताक्षरेषु अनर्थकाः कम् ईम् इत् उ इति ।

**निष्ट्वक्रासश्चिदिन्नरो भूरितोकाः वृकाद् इव।**

**बिभ्यस्यन्तोड ववाशिरे शिशिरं जीवनाय कम्।।**

शिशिरं जीवनाय । शिशिरं श्रृणातेः शम्नातेः वा । एमेनं सृजता सुते । आसृजत एनं सुते। तम् इत् वर्धन्तु नः गिरः । तं वर्धयन्तु नः गिरः स्तुतयः । गिरः गृणातेः । अयम् उ ते समतसि। अयं ते समतसि । इवः अपि दृश्यते । सुविदुः इव । सुविज्ञायेते इव । अथ अपि न इति एषः इत् इत्येतेन संप्रयुज्यते परिभये ।

**हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्।**

**शचीः मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम।।**

नरकं नि अरकम्। नीचैः गमनम्। न अस्मिन् रमणं स्थानम् अल्पम् अपि अस्ति इति वा । अथ अपि 'न च' इत्येषः 'इत्' इति एतेन संप्रयुज्यते अनुपृष्टे। 'न चेत् सुरां पिबन्ति' इति । सुरा सुनोतेः। एवम् उच्चावचेषु अर्थेषु निपतन्ति। ते उपेक्षितव्याः।

## चतुर्थपादः

इति इमानि चत्वारि पदजातानि अनुक्रान्तानि नामाख्याते च उपसर्गनिपाताः च । तत्र नामानि आख्यातजानि इति शाकटायनः नैरुक्तसमयः च । न सर्वाणि इति गार्ग्यः वैयाकरणानां च एके।।

तत् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्याताम् । संविज्ञातानि तानि यथा गौः अश्वः पुरुषः हस्ती इति। अथ चेत् सर्वाणि आख्यातजानि नामानि स्युः, यः कः च तत् कर्म कुर्यात् सर्वं तत् सत्त्वं तथा आचक्षीरन्। यः कः च अध्वानम् अश्नुवीत, अश्वः स वचनीयः स्यात्। यत् किञ्चित् तृन्द्यात् तृणं तत् । अथ अपि चेत् सर्वाणि आख्यातजानि नामानि स्युः, यावद्भिः भावैः संप्रयुज्येत तावद्भ्यः नामधेयप्रतिलम्भः स्यात् । तत्र एवं स्थूणा दरशया च आसंजनी च स्यात्।

अथ अपि यः एषां न्यायवान् कार्मनामिकः संस्कारः , यथा च अपि प्रतीतार्थानि स्युः, तथा एनानि आचक्षीरन्। पुरुषं पुरिशयः इति आचक्षीरन् । अष्टा इति अश्वम् । तर्दनम् इति तृणम् । अथ अपि निष्पन्ने अभिव्याहारे अभिविचारयन्ति - प्रथनात् पृथिवी इति आहुः। कः एनाम् अप्रथयिष्यत् ? किमाधारः च इति?

अथ अनन्विते अर्थे, अप्रादेशिके विकारे, पदेभ्यः पदेतरार्धान् संचस्कार शाकटायनः। एतेः कारितं च यकारादिं च अन्तकरणम्। अस्तेः शुद्धं च सकारादि च। अथ अपि सत्त्वपूर्वः भावः इति आहुः। अपरस्मात् भावात् पूर्वस्य प्रदेशः न उपपद्यते इति। तत् एतत् न उपपद्यते।

यथो हि नु वै एतम्। तत् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्यातां सर्वं प्रादेशिकम् इति। एवं सति अनुपालम्भः एष भवति ।

यथो एतत्। यः कः च तत् कर्म कुर्यात् सर्वं तत् सत्त्वं तथा आचक्षीरन् इति। पश्यामः समानकर्मणां नामधेयप्रतिलम्भम् एकेषां, न एकेषाम्। यथा तथा परिव्राजकः जीवनः भूमिज इति। एतेन एव उत्तरः प्रत्युक्तः।

यथो एतत्। यथा च अपि प्रतीतार्थानि स्युः तथा एनानि आचक्षीरन् इति। सन्ति अल्पप्रयोगाः कृतः अपि ऐकपदिकाः। यथा व्रततिः, दमूना, जाट्यः, आह्णारः, जागरूकः दर्विहोमी इति।

यथो एतत्। निष्पन्ने अभिव्याहारे अभिविचारयन्ति इति। भवति हि निष्पन्ने अभिव्याहारे योगपरोष्टिः। प्रथनात् पृथिवी इति आहुः, कः एनाम् अप्रथयिष्यत् किमाधारः च इति। अथ वै दर्शनेन पृथुः, अप्रथिता चेत् अपि अन्यैः। अथ अपि एवं सर्व एव दृष्टप्रवादाः उपालभ्यन्ते ।

यथो एतत्। पदेभ्यः पदेतरार्धान् संचस्कार इति। यः अनन्विते अर्थे संचस्कार स तेन गर्ह्यः। सा एषा पुरुषगर्हा।

यथो एतत्। अपरस्मात् भावात् पूर्वस्य प्रदेशः न उपपद्यते इति। पश्यामः पूर्वोत्पन्नानां सत्त्वानाम् अप्रस्मात् भावात् नामधेयप्रतिलम्भम् एकेषां न एकेषाम्। यथा बिल्वादः लम्बचूडकः इति। बिल्वं भरणात् वा भेदनात् वा ।

## पञ्चमपादः

अथापि इदम् अन्तरेण मन्त्रेषु अर्थप्रत्ययः न विद्यते । अर्थम् अप्रतियतः न अत्यन्तं स्वरसंस्कारोद्देशः । तत् इदं विद्यास्थानम्। व्याकरणस्य कार्त्स्न्यम्। स्वार्थसाधकं च। यदि मन्त्रार्थप्रत्ययाय अनर्थकं भवति, इति कौत्सः अनर्थकाः हि मन्त्राः। तत् एतेन उपेक्षितव्यम्।

नियतवाचः युक्तयः, नियतानुपूर्व्याः भवन्ति। अथापि ब्राह्मणेन रूपसंपन्नाः विधीयन्ते । उरु प्रथस्व। इति प्रथयति । प्रोहाणि। इति प्रोहति। अथापि अनुपपन्नार्थाः भवन्ति। ओषधे त्रायस्व एनम्। स्वधिते मा एनं हिंसीः इति आह हिंसन् ।

अथ अपि विप्रतिषिद्धार्थाः भवन्ति । एकः एव रुद्रः अवतस्थे न द्वितीयः ।असंख्याता सहस्राणि ये रुद्राः अधि भूम्याम्। अशत्रुः इन्द्र जज्ञिषे। शतं सेनाः अजयत् साकम् इन्द्रः।इति ।

अथापि जानन्तं सम्प्रेष्यति। अग्नये समिध्यमानाय अनुब्रूहि इति । अथापि आह अदितिः सर्वम् इति । अदितिः द्यौः अदितिः अन्तरिक्षम् इति। तत् उपरिष्टात् व्याख्यास्यामः। अथापि अविस्पष्टार्थाः भवन्ति।

अम्यक्, यादृश्मिन्,जारयायि, काणुका इति ।

अर्थवन्तः शब्दसामान्यात्। 'एतत् वै यज्ञस्य समृद्धं, यत् रूपसमृद्धं, यत् कर्म क्रियमाणम् ऋग्यजुः वा अभिवदति इति च ब्राह्मणम्। 'क्रीवन्तौ पुत्रर्नप्तृभिः'। यथो एतत्। नियतवाचो युक्तयो, नियतानुपूर्व्याः भवन्ति इति। लौकिकेषु अपि एतत्। यथा- इन्द्राग्नी,पितापुत्रौ इति। यथो एतत्। ब्राह्मणेन रूपसंपन्नाः विधीयन्ते इति। उदितानुवादः स भवति । यथो एतत्। अनुपपन्नार्थाः भवन्ति इति। आम्नायवचनात् अहिंसा प्रतीयेत।

यथो एतत्। विप्रतिषिद्धार्थाः भवन्ति इति। लौकिकेषु अपि एतत्। यथा असपत्नऽयं ब्राह्मणः। अनमित्रः राजा इति। यथो एतत्। जानन्तं संप्रेष्यति इति। जानन्तम् अभिवादयते। जानते मधुपर्कं प्राह। यथो एतत्। अदितिः सर्वम् इति। लौकिकेषु अपि एतत्। यथा- सर्वरसाः अनुप्राप्ताः पानीयम् इति। यथो एतत्। अविस्पष्टार्थाः भवन्ति इति। नैषः स्थाणोः अपराधः यत् एनम् अन्धः न पश्यति।

पुरुषापराधः स भवति। यथा जानपदीषु विद्यातः पुरुषविशेषः भवति। पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ।

सारांशः

तृतीये पादे यास्कः निपातानामर्थनिर्णयं करोति । परन्तु इमे त्रय एव भेदाः निपातानां भवन्ति इति वक्तुं न शक्यते । उपमार्थकाः अपि निपाताः पादपूरणा भवितुमर्हन्ति, ते कर्मोपसङ्ग्रहाः भवितुमर्हन्ति। प्रथमाध्यायस्य चतुर्थे पादे यास्कः शब्दानां धातुजत्वसिद्धान्तम् उपवर्णयति यास्कमतानुसारेण सर्वे शब्दाः धातुजाः । एतदेव सिद्धान्तं पोषयितुं निरुक्तस्य रचना कृताऽस्ति इति प्रतीयते। यास्कस्य मतं शाकटायनं यास्कव्यतिरिक्तान् निरुक्तकारान् चानुहरति। शाकटायनव्यतिरिक्ताः केचन वैयाकरणाः सर्वेषां शब्दानामाख्यातजत्वं नहि स्वीकुर्वन्ति।

गार्ग्यः सर्वेषां शब्दानां धातुजत्वं नहि स्वीकरोति। गार्ग्यमतानुसारेण केचन शब्दाः धातुजाः केचन अधातुजाः। तत्र- 'तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम् संविज्ञातानि तानि। यथा- गौः, अश्वः, पुरुषः, हस्तीति। अथ चेत् सर्वाणि आख्यातजानि नामानि स्युः, यः तत् कर्म कुर्यात् सर्वं तत्सत्त्वं तथा आचक्षीरन् । यः कश्चाध्वानमश्नुवीत अश्वः स अवचनीयः स्यात्। यत्किञ्चित् तृन्द्यात् तृणं तत् । अथापि चेत् सर्वाणि आख्यातजानि नामानि स्युः, यावद्भिः भावैः सम्प्रयुज्यते तावद्भ्यः नामधेयः प्रतिलम्भः स्यात्। तत्र एवं स्थूणा दरशया च आसञ्जनी च स्यादिति।

यास्कः नाम्नाम् आधारं व्यवहारं स्वीकरोति । यास्को वक्ति- 'निष्पन्ने अभिव्याहारे विचारयन्ती'ति। भवति हि निष्पन्ने अभिव्याहारे योगपरोष्टिः। पञ्चमे पादे यास्को वक्ति यत् निरुक्तिं विना मन्त्राणामर्थज्ञानं न भवति। अर्थज्ञानं विना स्वरस्य शब्दनिर्माणस्य च ज्ञानं भवितुं नार्हति। निरुक्तं चतुर्दशविद्यास्थानेषु अन्यतममस्ति । इदं व्याकरणस्य पूरकम्, साधकश्चास्ति । वेदव्याख्यायाः साधकश्चास्ति। कौत्समतानुसारेण मन्त्रा अनर्थकाः सन्ति। अत एव निरुक्तस्य वेदव्याख्यात्वाय स्वीकारे निरुक्तस्याप्यानर्थक्यं प्रसज्येत। कौत्समतानुसारेण वेदमन्त्राः अनर्थकाः, परस्परविरुद्धार्थकाः अस्पष्टार्थकाश्च सन्ति। किन्तु यास्कः मन्त्रामां सार्थकत्वं , तद्बोधाय निरुक्तस्य आवश्यकतां च साधयति। यास्को वक्ति यत् निरुक्तं विना सन्धियुक्तपदानां विभागो कर्तुं न शक्यते। यथा – 'अवसाय पद्वते रूद्रमूल' इति। अस्मिन् वाक्ये 'अवसाय' इति पदं वर्तते। अत्र पदपाठकर्तारः पदविभागमस्वीकृत्य तत् पदम् अवपूर्वकादस्धातोर्व्युत्पन्नं स्वीकरोति। अनेन प्रकारेणान्यान्यपि उदाहरणान्यभ्युहितव्यानि।

**शब्दावली-**

पश्पशाह्निकम्, रक्षा, उहः, आगमः, लघुः असन्देहः, तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उत त्वः. सक्तुमिव, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण, स्थूलषृषति, अनडबाही, आलभस्व, शशः, मञ्चकः, चत्वारिपदजातानि,

नाम्, आख्यातम्, उपसर्गः, निपातः, सत्वम्, भावप्रधानम्, निरुक्तम्, समाम्नायः, समाम्नातः, वेदः, संहृत्य इत्यादयाः।

**बोधप्रश्नाः-**

1. चत्वारिपदजातानि कानि?
2. भावप्रधानं किम्?
3. सत्वप्रधानानि कानि?
4. उच्चावच्चेष्वर्थेषु निपतन्ति के?
5. महाभाष्यस्य रचयिता कः?
6. निरुक्तस्य रचयिता कः?
7. निरुक्तं वेदपुरुषस्य किम् अङ्गमस्ति?
8. मुखं किं स्मृतम्?
9. केषां शब्दानाम् अनुशासनं क्रियते?
10. व्याकरणाध्ययनस्य कानि मुख्यप्रयोजनानि?

**अभ्यासप्रश्ना-**

1. व्याकरणाध्ययनस्य मुख्यप्रयोजनानि कानि?
2. व्याकरणाध्ययनस्य आनुषाङ्गिकप्रयोजनानि कानि?
3. गौः इत्यत्र कः शब्दः?
4. शब्दस्य ज्ञाने धर्मः उत् प्रयोगे निरूपयत?
5. पस्पशाह्निकस्य साराशं लिखत।
6. निरुक्तस्य परिचयं लिखत।
7. निरुक्तस्य प्रथमाध्यायस्य प्रथमपादस्य सारांशं लिखत।
8. निरुक्तस्य प्रथमाध्यायस्य द्वितीयपादस्य सारांशं लिखत।
9. निरुक्तस्य प्रथमाध्यायस्य तृतीयपादस्य सारांशं लिखत।
10. निरुक्तस्य प्रथमाध्यायस्य चतुर्थपादस्य सारांशं लिखत।
11. चत्वारिपदजातानि कानि विशदयत।
12. उपसर्गाणाम् अर्थं विशदयत।

**सन्दर्भग्रन्थसूची**


1. महाभाष्यम्, प्रां जयशंङ्कर लाल त्रिपाठी, चौखम्बा कृष्णदास अकादमि, वाराणसी 2002

2. निरूक्तम्, चौखम्बा प्रकाशन, डा. उमाशङ्करशर्मा ऋषि , वाराणसी

**सहायकग्रन्थसूची-**

1. निरूक्तसोपानम्- आचार्य शिवप्रसाद् द्विवेदी, चौकम्बा सुरभारती प्रकाशन, वाराणसी